पेशलदेवप्रणीतं

समासदर्पणम्

(SAMĀSADARPAṆA)

समासचक्रेण सनाथीकृतम्

निर्णयसागर-मुद्रणालयम्, मुंबई नं. २

मूल्यं ~~अमाक्ताः~~

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पेशलदेवप्रणीतं

समासदर्पणम्

(SAMĀSADARPAṆA)

समासचक्रेण सनाथीकृतम्

ग्रन्थेऽस्मिन् समस्ताः समासाः तद्भिदाश्च सोपपत्तिक-
तया निरूपिताः । तदनुषङ्गिकानि पाणिन्यादिसूत्राणि
चाधस्तात् टिप्पणीरूपेण निदर्शितानि । समासचक्रेण
समं समासविभेदपरिचायकं चक्रं परिशिष्टरूपेण संयो-
जितं चान्ते, येन सव्युत्पत्तिकं समासज्ञानं द्रागेव भवेत् ।

१९४८

निर्णयसागर-मुद्रणालयम्, मुंबई नं. २

मूल्यं [illegible] काः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[All rights reserved by the publisher]

पब्लिशर—सत्यभामाबाई पांडुरंग, निर्णयसागर प्रेस,
नं. २६-२८ कोलभाट स्ट्रीट, मुंबई

प्रिंटर—रामचंद्र येसू शेडगे, निर्णयसागर प्रेस,
नं. २६-२८ कोलभाट स्ट्रीट, मुंबई

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीः

समासदर्पणकारिकाः

गुरुपादपद्मजातामवगाह्य ज्ञानजाह्नवीं विमलाम् ।
सुखबोधाय शिशूनां रचयामि समासदर्पणं सम्यक् ॥ १ ॥
द्विविधः समास उक्तः सामान्यो विशेषकश्चेति ।
सामान्यो विज्ञेयः सुबन्ततः केवलं सुबन्तेन ॥ २ ॥
विशेषकस्तु चतुर्धा तत्पुरुषोऽथ बहुव्रीहिश्च ।
द्वन्द्वस्तृतीय उक्तस्तथा चतुर्थोऽव्ययीभावः ॥ ३ ॥
तत्पुरुषोऽपि द्विविधः सामान्यो विशेषकश्चेति ।
अष्टविधः सामान्यः सप्तविभक्तीनामथ नञश्चापि ॥ ४ ॥
द्विविधो विशेष उक्तः कर्मधारयोऽथ द्विगुश्चापि ।
यः समानाधिकरणः कर्मधारयः स विज्ञेयः ॥ ५ ॥
संख्यावाचकपूर्वो यः स द्विगुश्च समाख्यातः ।
प्रथमस्त्वष्टविधः स्याद्विशेषणपुरःपदश्चाद्यः ॥ ६ ॥
विशेषणोत्तरपदोऽथ विशेषणोभयपदश्चापि ।
उपमानपूर्वपदकश्चोपमानोत्तरपदश्चैव ॥ ७ ॥
वधारणापूर्वपदः कुगतिप्रादिक उपपदश्चैव ।
बहुव्रीहिर्द्विधा स्यात्सामान्यो विशेषकश्चेति ॥ ८ ॥
षोढा सामान्यः स्याद्वितीयादिविभक्तिभिश्चैव ।
विशेषकः पंचविधः प्रोक्तः संख्योत्तरपदश्चैकः ॥ ९ ॥
संख्योभयपदयुक्तो व्यतिहाररूपकश्चापि ।
दिगन्तरालरूपः सहपूर्वपदोऽपि विज्ञेयः ॥ १० ॥
द्वन्द्वोऽपि त्रिविधः स्यादितरेतरसमाहारैकशेषाः ।
द्वेधाऽव्ययीभावोऽपि सामान्यो विशेषकश्चेति ॥ ११ ॥
सामान्यो विज्ञेयः समर्थेन समासादव्ययस्य ।
विशेषो विभक्त्यर्थे समीपार्थे तथैव समृद्ध्यर्थे ॥ १२ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

वृद्ध्यर्थेऽभावार्थेऽत्ययार्थे च सांप्रते चैव ।
शब्दप्रादुर्भावे पश्चादर्थे तथा यथार्थे च ॥ १३ ॥
आनुपूर्व्ये तथैव च यौगपद्यार्थे च सादृश्यार्थे ।
सम्पत्त्यर्थे च तथा साकल्येऽन्तार्थे चाव्ययमात्रम् ॥ १४ ॥
यथाऽव्ययमसादृश्ये यावदवधारणे च मात्रार्थे ।
सुप्प्रतिनाऽक्षशलाकाख्याः परिणाऽपपरिबहिरंचवः ॥ १५ ॥
पंचम्याऽऽङ्मर्यादाभिविध्योश्च लक्षणेनाभिप्रती ।
आभिमुख्ये त्वनुयत्समया लक्षणेन यस्यायामे ॥ १६ ॥
तिष्ठद्वप्रभृतीनि च पारे मध्ये षष्ठ्या वा ।
संख्यावंश्येन तथा नदीभिश्चान्यपदार्थे सुबंतम् ॥ १७ ॥
एषां समासतः स्यादव्ययीभावो विशेषकश्चैव ।
केचित्त्वेषु समासा विभक्तीनामलोपनादलुगिति ॥ १८ ॥
समासदर्पणमित्थं रचितं वागीश्वरीं निधाय हृदि ।
पेशलदेवेन मुदा बालानामाशुबोधार्थम् ॥ १९ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समासदर्पणम्

गुरुपादपद्मजातामवगाह्य ज्ञानजाह्नवीं विमलाम् ।
सुखबोधाय शिशूनां रचयामि समासदर्पणं सम्यक् ॥ १ ॥
द्विविधः समास उक्तः सामान्यो विशेषकश्चेति ।
सामान्यो विज्ञेयः सुबन्ततः केवलं सुबन्तेन ॥ २ ॥

तत्र सामान्यो यथा—पूर्वं भूतः=भूतपूर्वः ।

विशेषकस्तु चतुर्धा तत्पुरुषोऽथ बहुव्रीहिश्च ।
द्वन्द्वस्तृतीय उक्तस्तथा चतुर्थोऽव्ययीभावः ॥ ३ ॥

अथ तत्पुरुषः ।

तत्पुरुषोऽपि द्विविधः सामान्यो विशेषकश्चेति ।
अष्टविधः सामान्यः सप्तविभक्तीनामथ नञश्चापि ॥ ४ ॥

प्रथमातत्पुरुषो यथा—पूर्वं कायस्य=पूर्वकायः । अपरं कायस्य=अपरकायः । अर्धं पिप्पल्याः=अर्धपिप्पली । द्वितीयं भिक्षायाः=द्वितीयभिक्षा । प्राप्तो जीविकां=प्राप्तजीविकः । आपन्नः जीविकां=आपन्नजीविकः ।

द्वितीयातत्पुरुषो यथा—कृष्णं श्रितः=कृष्णश्रितः । दुःखं अतीतः=दुःखातीतः । कूपं पतितः=कूपपतितः । ग्रामं गतः=ग्रामगतः । तुहिनं अत्यस्तः=तुहिनात्यस्तः । सुखं प्राप्तः=सुखप्राप्तः । दुःखं आपन्नः=दुःखापन्नः । ग्रामं गमी=ग्रामगमी । अन्नं बुभुक्षुः=अन्नबुभुक्षुः । खट्वां आरूढः=खट्वारूढो जाल्मः । मासं प्रतिमः=मासप्रतिमः । (प्रतिपच्चन्द्रः) । मुहूर्तं सुखं=मुहूर्तसुखम् ।

सूत्राणि—१ सह सुपा भूतपूर्वे चरट् इति निर्देशात् भूतशब्दस्य पूर्वनिपातः । २ पूर्वाण्यपराधरोत्तरैकदेशिनैकाधिकरणे । ३ अर्धं नपुंसकम् । ४ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । ५ प्राप्तापन्ने च द्वितीया । एकदेशीसमास एव प्रथमातत्पुरुष इति प्राञ्चः । ६ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । ७ गम्यादीनामुपसंख्यानम् । ८ खट्वाक्षेपे । ९ कालाः । १० अत्यन्तसंयोगे च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

तृतीयातत्पुरुषो यथा—शंकुलया खण्डः=शंकुलाखण्डः[1]। धान्येन अर्थः=धान्यार्थः[2]। मासेन पूर्वः=मासपूर्वः[3]। मात्रा सदृशः=मातृसदृशः[4]। पित्रा समः=पितृसमः[5]। माषेन ऊनम्=माषोनम्[6]। माषेन विकलं=माषविकलम्[7]। वाचा कलहः=वाक्कलहः[8]। आचारेण निपुणः=आचारनिपुणः[9]। गुडेन मिश्रः=गुडमिश्रः[10]। अयं सोपसर्गोऽपि। गुडेन संमिश्रः=गुडसंमिश्रः[11]। आचारेण श्लक्ष्णः=आचारश्लक्ष्णः[12]। मासेन अवरः=मासावरः[13]। हरिणा त्रातः=हरित्रातः[14]। नखैः भिन्नः=नखभिन्नः[15]। काकैः पेया=काकपेया, नदी[16]। वातेन छेद्यं=वातछेद्यम्[17]। दध्ना ओदनः=दध्योदनः[18]। गुडेन धाना=गुडधाना[19]।

चतुर्थीतत्पुरुषो यथा—यूपाय दारु=यूपदारु[1]। कुण्डलाय हिरण्यम्=कुण्डलहिरण्यम्[2]। गुरवे दक्षिणा=गुरुदक्षिणा[3]। भूताय बलिः=भूतबलिः[4]। गवे हितं=गोहितम्[5]। गवे रक्षितं=गोरक्षितम्[6]। द्विजाय अयम्–द्विजार्थः सूपः[7]। द्विजार्था यवागूः[8]। द्विजार्थं पयः[9]।

पंचमीतत्पुरुषो यथा—चोरात् भयं=चोरभयम्[1]। सिंहात् भीतः=सिंहभीतः[2]। वृकात् भीतिः=वृकभीतिः[3]। व्याघ्रात् भीः=व्याघ्रभीः[4]। सुखात् अपेतः=सुखापेतः[5]। कल्पनायाः अपोढः=कल्पनापोढः[6]। चक्रात् मुक्तः=चक्रमुक्तः[7]। स्वर्गात् पतितः=स्वर्गपतितः[8]। तरंगात् अपत्रस्तः=तरंगापत्रस्तः[9]।

षष्ठीतत्पुरुषो यथा—राज्ञः पुरुषः=राजपुरुषः[1]। कृष्णस्य भक्तः=कृष्णभक्तः[2]। आम्रस्य फलं=आम्रफलम्[3]। ब्राह्मणानां याजकः=ब्राह्मणयाजकः[4]। देवानां पूजकः=देवपूजकः[5]। सर्वेषां श्वेततरः=सर्वश्वेतः[6]। सर्वेषां महत्तरः=सर्वमहान्[7]। इध्मस्य वश्चनः=इध्मवश्चनः[8]। दारिद्र्यस्य नाशनः=दारिद्र्यनाशनः[9]।

सूत्राणि—१ तृतीया तत्कृतार्थेन गुणवचनेन। २ पूर्वसदृशसमेनार्थकलहमिश्रनिपुणश्लक्ष्णैः। ३ अवरस्योपसंख्यानम्। ४ कर्तृकरणे कृता बहुलम्। ५ कृत्यैरधिकार्थवचने। ६ अन्नेन व्यंजनम्। ७ भक्ष्येण मिश्रीकरणम्। ८ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। ९ अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्तव्यम्। १० पंचमी भयेन। भयभीतभीतिभीभिरिति वक्तव्यम्। ११ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः। १२ षष्ठी। १३ याजकादिभ्यश्च। १४ गुणान्तरेणतरलोपश्चेति वक्तव्यम्। १५ कृत्योर्ण षष्ठी समस्यत इति वाच्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu. Digitized by eGangotri

सप्तमीतत्पुरुषो यथा—अक्षेषु शौण्डः=अक्षशौण्डः । ईश्वरे अधीनः=ईश्वराधीनः । सांकाश्ये सिद्धः=सांकाश्यसिद्धः । आतपे शुष्कः=आतपशुष्कः स्थाल्यां पक्वः=स्थालीपक्वः । चक्रे बन्धः=चक्रबन्धः ।

नञ्तत्पुरुषो यथा—न ब्राह्मणः=अब्राह्मणः । न वृषभः=अवृषभः । न पापं=अपापम् । न धर्मः=अधर्मः ।

इति तत्पुरुषः ।

अथ कर्मधारयः ।

द्विविधो विशेष उक्तः कर्मधारयोऽथ द्विगुश्चापि ॥
यः समानाधिकरणः कर्मधारयः स विज्ञेयः ॥ ५ ॥
संख्यावाचकपूर्वो यः स द्विगुश्च समाख्यातः ॥
प्रथमस्त्वष्टविधः स्याद्विशेषणपुरःपदश्चाद्यः ॥ ६ ॥
विशेषणोत्तरपदोऽथ विशेषणोभयपदश्चापि ॥
उपमानपूर्वपदकश्चोपमानोत्तरपदश्चैव ॥ ७ ॥
धारणापूर्वपदः कुगतिप्रादिक उपपदश्चापि ॥

विशेषणपूर्वपदः कर्मधारयो यथा—एकश्चासौ नाथश्च=एकनाथः । सर्वे च ते याज्ञिकाश्च=सर्वयाज्ञिकाः । जरन्तश्च ते नैयायिकाश्च=जरन्नैयायिकाः । पुराणश्च ते मीमांसकाश्च=पुराणमीमांसकाः । नवाश्च ते पाठकाश्च=नवपाठकाः । केवलाश्च ते वैयाकरणाश्च=केवलवैयाकरणाः । पापश्चासौ नापितश्च=पापनापितः । अणकश्चासौ कुलालश्च=अणककुलालः । अश्रेणयः श्रेणयः कृताः=श्रेणीकृताः । संश्चासौ वैद्यश्च=सद्वैद्यः । महान् चासौ वैयाकरणश्च=महावैयाकरणः । कुत्सितो राजा=किंराजा । कृष्णश्चासौ सर्पश्च=कृष्णसर्पः । कृष्णौ च तौ सर्पौ च=कृष्णसर्पौ । कृष्णाश्च ते सर्पाश्च=कृष्णसर्पाः । रक्ता

सूत्राणि—१ सप्तमी शौण्डैः । अधिशब्दोऽत्र पठ्यते । अध्युत्तरपदादिति खः । २ सिद्धशुष्कपक्वबंधैश्च । ३ नञ् । ४ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन । ५ पाषाणके कुत्सितैः । ६ श्रेण्यादयः कृतादिभ्यः । ७ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः । ८ किं क्षेपे । ९ विशेषणं विशेष्येण बहुलम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चासौ लता च=रक्तलता[१]। रक्ते च ते लते च=रक्तलते[१]। रक्ताश्च ता लताश्च=रक्तलताः। नीलं च तत् उत्पलं च=नीलोत्पलम्[१]। नीले च ते उत्पले च=नीलोत्पले[१]। नीलानि च तानि उत्पलानि च=नीलोत्पलानि[१]। पूर्वश्चासौ वैयाकरणश्च=पूर्ववैयाकरणः[३]। अपरश्चासौ अध्यापकश्च=अपराध्यापकः[३]।

विशेषणोत्तरपदः कर्मधारयो यथा—वैयाकरणश्चासौ खसूचिश्च=वैयाकरणखसूचिः[३]। प्रशस्ता चासौ गौश्च=गोमतल्लिका[४]। युवा चासौ खलतिश्च=युवखलतिः[५]। गौश्चासौ वृन्दारकश्च=गोवृन्दारकः[६]।

विशेषणोभयपदः कर्मधारयो यथा—सितं च तत् रक्तं च=सितरक्तम्[७]। शीतं च तत् उष्णं च=शीतोष्णम्[८]। कृतं च तत् अकृतं च=कृताकृतम्[९]।

उपमानपूर्वपदः कर्मधारयो यथा—घन इव श्यामः=घनश्यामः[१०]। कम्बुवत् ग्रीवा=कम्बुग्रीवा[१०]। चन्द्रवत् मुखं=चन्द्रमुखम्[१०]।

उपमानोत्तरपदः कर्मधारयो यथा—पुरुषः व्याघ्र इव=पुरुषव्याघ्रः[११]। नरः सिंह इव=नरसिंहः[११]।

अवधारणापूर्वपदः कर्मधारयो यथा—विद्यैव धनं=विद्याधनम्[११]। अविद्यैव शृंखला=अविद्याशृंखला[११]। मयूरो व्यंसकः=मयूरव्यंसकः[१२]। नास्ति किंचन यस्य सः=अकिंचनः[१३]। नास्ति कुतो भयं यस्य सः=अकुतोभयः[१३]। अन्यो राजा=राजान्तरम्[१३]।

मध्यमपदलोपी समासो यथा—शाकप्रियः पार्थिवः=शाकपार्थिवः[१४]। देवपूजको ब्राह्मणः=देवब्राह्मणः।

कुसमासो यथा—कुत्सितः पुरुषः=कापुरुषः। कुत्सितः अश्वः=कदश्वः। कुत्सितः पंथाः=कापथः।

सूत्राणि—१ विशेषणं विशेष्येण बहुलम्। २ पूर्वापरप्रथमचरमजघन्यसमानमध्यममध्यवीराश्च। ३ कुत्सितानि कुत्सनैः। ४ प्रशंसावचनैश्च। ५ युवा खलतिपलितवलितजरतीभिः। ६ वृन्दारकनागकुंजरैः पूज्यमानम्। ७ वर्णो वर्णेन। ८ क्तेन नञ्विशिष्टेनानञ्। ९ उपमानानि सामान्यवचनैः। १० उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। ११ विशेषणं विशेष्येण बहुलम्। १२ मयूरव्यंसकादयश्च। १३ आख्यातमाख्यातेन क्रियासातत्ये। १४ शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गतिसमासो यथा—उररीकृत्य । शुक्लीकृत्य । पटपटाकृत्य । कारिकाकृत्य । खाट्कृत्य । सत्कृत्य । असत्कृत्य । अलंकृत्य । अन्तर्हृत्य । कर्णेहत्य । मनोहृत्य । पुरस्कृत्य । अस्तेगत्य । अच्छगत्य । अदःकृत्य । तिरोभूय । तिरःकृत्य । उपाजेकृत्य । अन्वाजेकृत्य । साक्षात्कृत्य । लवणंकृत्य । उरसिकृत्य । मनसिकृत्य । मध्येकृत्य । पदेकृत्य । हस्तेकृत्य । पाणौकृत्य । प्राध्वङ्कृत्य । जीविकामिव कृत्वा=जीविकाकृत्य । उपनिषदमिव कृत्वा=उपनिषत्कृत्य ।

प्रादिसमासो यथा—प्रगतः आचार्यः=प्राचार्यः । अतिक्रान्तो मालां=अतिमालः । अवक्रुष्टः कोकिलया=अवकोकिलः । परिम्लानः अध्ययनाय=पर्यध्ययनः । निष्क्रान्तः कौशाम्ब्याः=निष्कौशाम्बिः ।

उपपदसमासो यथा—कुम्भं करोतीति=कुम्भकारः ।

इति कर्मधारयः ।

अथ द्विगुः ।

द्विगुर्यथा—पञ्चानां गवानां समाहारः=पंचगवम् । त्रयाणां शृंगाणां समाहारः=त्रिशृंगम् । पञ्चानां फलानां समाहारः=पंचफली । सप्त च ते ऋषयश्च=सप्तर्षयः ।

इति द्विगुः ।

अथ बहुव्रीहिः ।

बहुव्रीहिर्द्विधा स्यात्सामान्यो विशेषकश्चेति ॥ ८ ॥
षोढा सामान्यः स्याद्द्वितीयादिविभक्तिभिश्चैव ॥

षोढा सामान्यो यथा—प्राप्तं उदकं यं सः=प्राप्तोदको ग्रामः । भुक्तं ओदनं येन सः=भुक्तौदनो भूपः । निर्जितः कामो येन सः निर्जितकामः शिवः । विभक्तं धनं यैः ते=विभक्तधना बांधवाः । दत्तं सूपं यस्मै सः=दत्त-

---

सूत्राणि—१ प्रादयो गताद्यर्थे प्रथमया । २ अत्यादयः क्रान्ताद्यर्थे द्वितीयया । ३ अवादयः कुष्टाद्यर्थे तृतीयया । ४ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या । ५ निरादयः क्रान्ताद्यर्थे पंचम्या । अत्र सर्वत्र 'कुगतिप्रादयः' इति समासः । ६ उपपदमतिङ् । ७ विशेषणं विशेष्येण बहुलम् । ८ सनपुंसकम् । ९ द्विगुरेकवचनम् । १० संख्यापूर्वो द्विगुः । ११ अनेकमन्यपदार्थे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूपो ब्राह्मणः । उद्धृतं धनं यस्मात् तत्=उद्धृतधनं कुण्डलम् । चक्रं पाणौ यस्य सः=चक्रपाणिर्हरिः । करे स्थितं धनं यस्य सः=करस्थितधनो वणिक् । पुष्पिता द्रुमा यस्मिन् तत्=पुष्पितद्रुम आरामः । बहवो यज्वानो यस्यां सा=बहुयज्वा शाला । पुष्पिता द्रुमा यस्मिन् तत्=पुष्पितद्रुमं वनम् । खरस्य मुखमिव मुखं यस्य सः=खरमुखस्तुरगः । उष्ट्रस्य मुखमिव मुखं यस्य सः= उष्ट्रमुखो यक्षः । उच्चैर्घटो यस्याः सा=उच्चैर्घटा नारी ।

अंगगात्रोदरस्तनकण्ठोष्ठदन्तमुखाक्षिकेशाः स्त्रियां बहुव्रीहौ ईबन्ता भवन्ति । ते च यथा—सुन्दरं अंगं यस्याः सा=सुन्दरांगी । शोभनं गात्रं यस्याः सा=सुगात्री । कृशं उदरं यस्याः सा=कृशोदरी । चारू स्तनौ यस्याः सा=चारुस्तनी । इन्दीवरे इव अक्षिणी यस्याः सा=इन्दीवराक्षी । कम्बुरिव कण्ठो यस्याः सा=कंबुकण्ठी । कुटिलाः केशा यस्याः सा=कुटिलकेशी ।

इतरेषामंगादिवाचकानां स्त्रीत्वेऽपि आबन्तत्वमेव । चारुदेहा । विस्तृतालका । आवृतकुचा । कुन्ददशना, इत्यादि ।

विशेषकः पंचविधः प्रोक्तः संख्योत्तरपदश्चैकः ॥ ९ ॥
संख्योभयपदयुक्तो व्यतिहाररूपकश्चापि ॥
दिगन्तरालरूपः सह पूर्वपदो विज्ञेयः ॥ १० ॥

संख्योत्तरपदो यथा—दशानां समीपे ये सन्ति ते=उपदशाः । विंशतेरासन्ना याः सन्ति ताः=आसन्नविंशाः ।

संख्योभयपदो यथा—द्वौ वा त्रयो वा द्वित्राः । द्विरावृत्ता दश= द्विदशाः ।

व्यतिहारलक्षणो यथा—केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवर्तत इति= केशाकेशी । दण्डेन दण्डेन इदं युद्धं प्रवर्तत इति=दण्डादण्डी ।

दिगन्तरालक्षणो यथा—दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं= दक्षिणपूर्वा ।

सहपूर्वपदो यथा—सह पुत्रेण वर्तत इति=सपुत्रः, सहपुत्रो वा आगतः ।

इति बहुव्रीहिः ।

सूत्राणि—१ अनेकमन्यपदार्थे । २ बहुव्रीहौ संख्येये डज् बहुगणात् । ३ ति विंशेर्डिति । ४ संख्ययाव्ययासन्नदूराधिकसंख्याः संख्येये । ५ तत्र तेनेदमिति सरूपे । ६ दिङ्नामान्यन्तराले । ७ सप्तमी सहेति पूर्वयोगे । ८ वोपसर्जनस्य ।

CC-0. Nepal Rajkiya Pustakalaya Collection. Kathmandu. Digitized by eGangotri

अथ द्वंद्वः ।

द्वन्द्वोऽपि त्रिविधः स्यादितरेतरसमाहारैकशेषाः ।

इतरेतरद्वंद्वो यथा—धवश्च खदिरश्च=धवखदिरौ । हरिश्च हरश्च=हरिहरौ ।

समाहारद्वन्द्वो यथा—हरिश्च हरश्च गुरश्च=हरिहरगुरवः । प्राणितूर्यसेनांगानां द्वंद्वैकवद्भावः । प्राण्यंगे यथा–पाणी च पादौ च मुखं च=पाणिपादमुखम् । तूर्यांगे यथा–मार्दंगिकश्च वैणविकश्च=मार्दंगिकवैणविकम् । शंखश्च पटहश्च=शंखपटहम् । सेनांगे यथा–राजन्यारथाश्च अश्वाश्च=राजन्यरथाश्वम् ।

एकशेषो यथा—रामश्च रामश्च रामश्च ते=रामाः । वक्रदण्डश्च कुटिलदण्डश्च=वक्रदण्डौ, कुटिलदण्डौ वा । गार्ग्यश्च गार्ग्यायणश्च=गार्ग्यौ । गार्गी च गार्ग्यायणौ च=गार्गाः । हंसी च हंसश्च=हंसौ । भ्राता च स्वसा च=भ्रातरौ । पुत्रश्च दुहिता च=पुत्रौ । माता च पिता च पितरौ । श्वश्रूश्च श्वशुरश्च=श्वशुरौ ।

इति द्वंद्वः ।

अथाव्ययीभावः ।

द्वेधाऽव्ययीभावोऽपि सामान्यो विशेषकश्चेति ॥ ११ ॥
सामान्यो विज्ञेयः समर्थेन समासादव्ययस्य ॥
तत्र सामान्यो यथा—दिशोर्मध्यं=अपदिशम् ।
विशेषो विभक्त्यर्थे समीपार्थे तथैव समृद्ध्यर्थे ॥ १२ ॥
वृद्ध्यर्थेऽभावार्थेऽत्ययार्थे च साम्प्रते चैव ॥
शब्दप्रादुर्भावे पश्चादर्थे तथा यथार्थे च ॥ १३ ॥

सूत्राणि—१ चार्थद्वंद्वः । २ द्वंद्वश्च प्राणितूर्यसेनांगानाम् । ३ सरूपाणामेकशेष एकविभक्तौ । ४ विरूपाणामपि समार्थानाम् । ५ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । ६ स्त्री पुंवच्च । ७ पुमान् स्त्रिया । ८ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् । ९ पिता मात्रा । १० श्वशुरः श्वश्वा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आनुपूर्व्ये तथैव च यौगपद्यार्थे च सादृश्यार्थे ॥
सम्पत्त्यर्थे च तथा साकल्येऽन्तार्थे चाव्ययमात्रम् ॥ १४ ॥
यथाव्ययमसादृश्ये यावदवधारणेऽथ मात्रार्थे ।
सुप्प्रतिनाऽक्षशलाकासंख्याः परिणाऽपपरिबहिरंचवः ॥१५॥
पंचम्याऽऽङ्मर्यादाभिविध्योश्च लक्षणेनाभिप्रती ॥
आभिमुख्ये त्वनुयत्समया लक्षणेन यस्यायामे ॥ १६ ॥
तिष्ठद्गुप्रभृतीनि च पारे मध्ये षष्ठ्या वा ॥
संख्या वंश्येन तथा नदीभिश्चान्यपदार्थे सुबन्तम् ॥ १७ ॥
एषां समासतः स्यादव्ययीभावो विशेषकश्चैव ॥

विशेषो यथा—(१) विभक्त्यर्थे—हरौ इति=अधिहरि। (२) समीपार्थे—कृष्णस्य समीपं=उपकृष्णम्। (३) समृद्ध्यर्थे—मद्राणां समृद्धिः=सुमद्रम्। ४) वृद्ध्यर्थे—यवनानां वृद्धिः=दुर्यवनम्। (५) अभावार्थे—मक्षिकाणां अभावः=निर्मक्षिकम्। (६) अत्ययार्थे—हिमस्य अत्ययः=अतिहिमम्। अत्ययो ध्वंसः। (७) असम्प्रत्यर्थे—निद्रा संप्रति न युज्यते इति=अतिनिद्रम्। (८) शब्दप्रादुर्भावे—हरिशब्दस्य प्रकाशः=इति हरि। (९) पश्चादर्थे—विष्णोः पश्चात्=अनुविष्णु। (१०) यथार्थे—योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः। (क) रूपस्य योग्यं=अनुरूपम्। (ख) अर्थमर्थं प्रति=प्रत्यर्थम्। (ग) शक्तिमनतिक्रम्य=यथाशक्ति। (घ) हरेः सादृश्यं=सहरि। (११) आनुपूर्व्ये—ज्येष्ठस्यानुपूर्व्येणेति=अनुज्येष्ठम्। (१२) यौगपद्यार्थे—चक्रेण युगपत्=सचक्रम्। (१३) सादृश्यार्थे—सख्या सदृशः=ससखि। (१४) सम्पत्त्यर्थे—क्षत्राणाम् सम्पत्तिः=सक्षत्रम्। (१५) साकल्ये—तृणमप्यपरित्यज्य=सतृणमत्ति (१६) अन्तार्थे—अग्निग्रन्थपर्यन्तमधीते=साग्नि। (१७) यथाऽसादृश्ये—बलमनतिक्रम्य=यथाबलम्। (१८) यावदवधारणे—यावन्तः श्लोकाः=यावच्छ्लोकम्। (१९) सुप्प्रतिना मात्रार्थे-शाकस्य लेशः=शाकप्रति। (२०) अक्षशलाकासंख्याः-परिणा—अक्षेण विपरीतम् वृत्तं=अक्षपरि। शलाकापरि। (२१) अपपरिबहिरंचवः पंचम्याः—अपविष्णु। परिविष्णु, बहिर्वनम्। प्राग्वनम्। (२२) मर्यादाभिविध्योः—आमुक्ति, आमुक्तेः। आबालम्, आबालात्। (२३) लक्षणेनाभिप्रती आभिमुख्ये—अभिमन्यु-अभ्यग्नि। अग्निं प्रति=प्रत्यग्नि।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized by eGangotri

(२४) अनुयत्समयाः—वनस्य समीपं=अनुवनम्। (२५) यस्य चायामः आयामो दैर्घ्यं—गंगाया अनु=अनुगंगं वाराणसी। (२६) तिष्ठद्गुप्रभृतीनि च—तिष्ठन्ति गावो यस्मिन् काले सः=तिष्ठद्गुदोहनकालः। (२७) पारे मध्ये षष्ठ्या वा—पारे गंगात् गंगापारात्। मध्ये गंगायाः गंगामध्यात्। पक्षे षष्ठीतत्पुरुषः। (२८) संख्यावंश्येनः—त्रिमुनिव्याकरणम्। (२९) नदीभिश्च=सप्तगंगम्। द्वियमुनम्। (३०) अन्यपदार्थे च संज्ञायाम्—उन्मत्तगङ्गं नाम देशः। लोहितगङ्गम्।

इत्यव्ययीभावः।

केचित्त्वेषु समासा विभक्तीनामलोपनादलुगिति ॥ १८ ॥

यथा—स्तोकान्मुक्तः। इत्यादि।

समासदर्पणमित्थं रचितं वागीश्वरीं निधाय हृदि ॥
पेशलदेवेन मुदा बालानामाशुबोधार्थम् ॥ १९ ॥

इति समासदर्पणम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिशिष्टम् १

(समासचक्रम्)

षोढा समासाः संक्षेपादष्टाविंशतिधा पुनः ।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥ १ ॥
तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः ।
द्विगुर्द्विधा बहुव्रीहिः सप्तधा परिकीर्तितः ॥ २ ॥
द्वन्द्वोऽपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः ।
तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् ॥ ३ ॥
चकार बहुलो द्वन्द्वः स चासौ कर्मधारयः ।
यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषः स्मृतः ॥ ४ ॥
वृक्षशाखा तत्पुरुषः श्वेताश्वः कर्मधारयः ।
रक्तवस्त्रो बहुव्रीहिर्द्वन्द्वश्चन्द्रदिवाकरौ ॥ ५ ॥
अथ प्रयोगाः कथ्यन्ते ते च पंचविधाः स्मृताः ।
सकर्मकोऽकर्मकश्च तथैव स्याद्विकर्मकः ॥ ६ ॥
तुर्योऽथ कर्मणि प्रोक्तो भावे ज्ञेयोऽथ पंचमः ।
कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात्सकर्मकः ॥ ७ ॥
अकर्मकः कर्मशून्यः कर्मद्वंद्वी द्विकर्मकः ।
प्रथमा कर्तरि यदा द्वितीया कर्मणि स्मृता ॥ ८ ॥
तृतीया कर्तरि यदा कर्मणि प्रथमा तदा ।
कृष्णः करोति कल्याणं वासुदेवो विराजते ॥ ९ ॥
गोपालो गां पयो दोग्धि ब्रह्मणा सृज्यते जगत् ।
स्थीयते जगदीशेन कारकं प्रोच्यतेऽधुना ॥ १० ॥
कर्ता कर्म च करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणं इत्याहुः कारकाणि षट् ॥ ११ ॥
क्रियायामन्वयो यस्य कारकः स उदाहृतः ।
क्रियायामन्वयाभावात्संबन्धो नहि कारकः ॥ १२ ॥
निर्देशे प्रथमा प्रोक्ता सैव चामन्त्रणेष्वपि ।
द्वितीया कर्मणि प्रोक्ता तृतीया कर्तृकरणयोः ॥ १३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानज्ञाप्येऽङ्गविकारे हेतावपि तद्दिष्यते ।
तादर्थ्ये सम्प्रदाने च चतुर्थी स्याच्च सर्वदा ॥ १४ ॥
हेत्वपादानयोः पंचमी षष्ठी तु कर्तृकर्मसंबन्धे ।
अधिकरणनिमित्ते सत्त्वे सप्तमी स्याच्च विषमेऽपि ॥ १५ ॥
विशेषणं पुरस्कृत्य विशेष्यं तदनन्तरम् ।
कर्तृकर्मक्रियायुक्तमेतदन्वयलक्षणम् ॥ १६ ॥
यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि ॥ १७ ॥
सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १८ ॥
आदौ कर्तृपदं वाच्यं द्वितीयादि पदं ततः ।
त्वातुमुन्ल्यप्च मध्ये तु कुर्यादन्ते क्रियापदम् ॥ १९ ॥
कृषको हलाय वृक्षात् शाखां छित्त्वा कुठारेण ।
स्वीयं क्षेत्रं कर्षति तक्षकान्निर्माय लांगलं रम्यम् ॥ २० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ विभक्त्यर्थाः ।

प्रथमा ।

हे राम! अत्रागच्छ । अत्र 'हे राम' इति संबोधने प्रथमा ।
अश्वो धावति । अत्र 'अश्वः' इति कर्तरि प्रथमा ।
विष्णुना प्रपंचः क्रियते । अत्र 'प्रपंचः' कर्मणि प्रथमा ।

द्वितीया ।

कृष्णो 'भक्तान्' रक्षति । अत्र 'भक्तान्' इति कर्मणि द्वितीया ।

तृतीया ।

रामेण बाणेन हतो वाली । अत्र 'रामेण' इति कर्तरि तृतीया, 'बाणेन' इति करणे तृतीया । जटाभिस्तापसः । अत्र 'जटाभिः' इति ज्ञानज्ञाप्ये तृतीया । अक्ष्णा काणः । अत्र 'अक्ष्णा' इति अंगविकारे तृतीया । पुण्येन दृष्टो हरिः । अत्र 'पुण्येन' इति हेतौ तृतीया ।

चतुर्थी ।

मुमुक्षुर्मुक्तये हरिं भजति । अत्र 'मुक्तये' इति तादर्थ्ये चतुर्थी । राजा विप्राय गां ददाति । अत्र 'विप्राय' इति संप्रदाने चतुर्थी ।

पंचमी ।

चौराद्बिभेति । अत्र 'चौरात्' इति हेतौ पंचमी । अश्ववारो धावतोऽश्वात् पतति । अत्र 'अश्वात्' इति अपादाने पंचमी ।

षष्ठी ।

कृष्णस्य कृतिः । अत्र 'कृष्णस्य' इति कर्तरि षष्ठी । जगतः कर्ता कृष्णः । अत्र 'जगतः' इति कर्मणि षष्ठी । कृष्णस्य भक्तः । अत्र 'कृष्णस्य' इति सम्बन्धे षष्ठी ।

सप्तमी ।

पाचकः स्थाल्यामोदनं पचति । अत्र 'स्थाल्यां' इति अधिकरणे सप्तमी चर्मणि द्वीपिनं हन्ति भूपालोऽयम् । अत्र 'चर्मणि' इति निमित्ते सप्तमी । अस्मिन् हृदय कठिने । अत्र 'अस्मिन्' इति विषये सप्तमी ।

CC-0. Nepal Sanskrit University Digital Library Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समासविभेदपरिचायकं

परिशिष्टम् २



CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

—कतिपया बालोपयोगिग्रन्थाः—

●

शब्दरूपावलिः

शब्दरूपलिङ्गपरिचयार्थमस्य पाठोऽत्यावश्यक इति प्राथमिकाध्ययने नास्मादन्यः समीचीनतरो ग्रन्थः ।

मूल्यं ४ आणकाः

समासचक्रम्

गीर्वाणभाषाज्ञाने समासज्ञानमत्यावश्यकमिति बाल्य एवास्य पाठः कृतः सर्वत्र दरीदृश्यते ।

मूल्यं ५ आणकाः

धातुरूपावलिः

अयं ग्रन्थः सम्यक्पठितः समेषां धातुरूपाणां सम्यक्परिचयं विधत्ते इत्यस्योपयोगो व्युत्पित्सूनामतीव भवति ।

मूल्यं ६ आणकाः

हितोपदेशः

अस्मिन्ग्रन्थे त्वतीव हृदयङ्गमाः कथाः सरलभाषायां निरूपिताः । अस्य पाठेन बालेभ्यः सदुपदेशः, कार्याकार्यज्ञानं, गीर्वाणभाषाज्ञानं च सरलतया भवति ।

मूल्यं १॥ सार्धरूप्यकम्

निर्णयसागर-मुद्रणालयम्, मुंबई २

CC-0. Nepal Sanskrit Academy, Kathmandu Collection